[1]यदा सर्वे सह [2]भवन्ति मिश्राः परस्परेण। अग्नये विविचये, अग्ने विविचे[3], अग्निं विविचिम्, अग्नेर्विविचेः, अग्निर्विविचिरिदम्। "[1]वि ते विष्वक्" "[2]त्वामग्ने मानुषीरीडत इति ॥ १८ ॥

**अग्नये विपृचेऽष्टाकपालं यदि गार्हपत्याहवनीयौ ॥ १९ ॥**

**अग्निना विपृचा वयं गीर्भिः स्तोमं मनामहे। स नो रास्व सहस्रिणः॥ कविरग्निस्समिध्यते विप्रो यज्ञस्य साधनः। विपृश्चन् रास्व नो वसु इति याज्यानुवाक्ये ॥ २० ॥**

गार्हपत्याहवनीययोस्संसर्गे अग्नये विपृचे। अग्ने विपृङ्, अग्निं विपृचम्, अग्नेर्विपृचः, अग्निर्विपृगिदम् ॥ १९, २० ॥

**अग्नये वीतयेऽष्टाकपालं यदि गार्हपत्यदक्षिणाग्नी दक्षिणाग्न्याहवनीयौ वा ॥ २१ ॥**

अग्नये वीतये, अग्ने वीते, अग्निं वीतिम्, अग्नेर्वीतेः, अग्निर्वीतिरिदम्। "[3]अग्न आयाहि वीतये" "[4]यो अग्निं देववीतये" इति। [क]सर्वत्र चतुर्थी परिपठिता ॥ २१ ॥

**अग्नये शुचयेऽष्टाकपालं यदि प्रादाव्येनाभ्यादाव्येन शवाग्निना वा। अग्नये सङ्कुसुकायाष्टाकपालं यदि सूतकाग्निना। "सङ्कुसुको विकुसुको विकिरो यश्च विष्किरः। माषाज्येन नलेध्मेन क्रव्यादं शमयामसि"॥ "अस्मिन् वयं सङ्कुसुकेऽग्नौ रिप्राणि मृज्महे। अभूम यज्ञियाः शुद्धाः प्र ण आयूंषि तारिषत्"॥ इति याज्यानुवाक्ये। अग्नयेऽप्सुमतेऽष्टाकपालं यदि वैद्युतेन ॥ २२ ॥**

---

1. B. 1. reads तदा.　　2. B. 2. विभवन्ति.

3. B. 1. विविच्न्.

क. सर्वत्र देवतानिर्देशश्चतुर्थ्यन्तः परिपठितस्सूत्रकारेण। तदनुसारेणान्यासां विभक्तीनामूहः कार्य इति।

१ विते विष्वग्वातजूतासो अग्ने भामासः। शुचे शुचयश्चरन्ति ॥　　(तै. सं. ३.३.११.१.)

२ त्वामग्ने मानुषीरीडते विशो होत्राविदं विविचिं रत्नधातमम्। गुहा सन्तं सुभग विश्वदर्शतं तुविष्मणसं सुयजं घृतश्रियम् ॥　　(तै. सं. ३.३.११.२.)

३ अग्न आयाहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि ॥

४ यो अग्निं देववीतये हविष्माँ आविवासति। तस्मै पावक मृडय ॥



P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

